# संस्कृत
# व्याकरण एवं रचना

## Teachers' Manual

कक्षा–6

## पाठ–1 वर्ण–विचारः

1. (i) अ, (ii) ब, (iii) स, (iv) द, (v) अ, (vi) ब, (vii) स, (viii) द, (ix) अ, (x) ब।
2. (i) द् + व् (ii) ज् + ञ् (iii) क् + ष् (iv) द् + ध् (v) द् + य् (vi) ध् + य् (vii) त् + र् (viii) ड् + र् (ix) म् + र् (x) स् + र् (xi) द् + र् (xii) प् + र् (xiii) क् + र् (xiv) ग् + र् (xv) ट् + र् (xvi) श् + र् (xvii) भ् + र् (xviii) ज् + य्।
3. (i) माम् (ii) बालः (iii) लता (iv) अस्ति (v) कमलम् (vi) पिता (vii) किम् (viii) करोति (ix) भवति (x) कपोतः ।
4. (i) व् + इ + द् + य् + आ + ल् + अ + य् + अ + :, (ii) प् + आ + ठ् + अ + श् + आ + ल् + आ, (iii) च् + अ + क् + र् + अ + म्, (iv) र् + आ + स् + अ + भ् + अ + :, (v) ग् + अ + र् + द् + अ + भ् + अ + :, (vi) ह् + ए + म् + अ + न् + त् + अ + :, (vii) भ् + अ + व् + अ + न् + अ + म्, (viii) च् + अ + र् + अ + ण् + औ, (ix) न् + आ + स् + इ + क् + आ, (x) ल् + अ + क् + ष् + म् + ई
5. विभिन्न ध्वनीः 'वर्ण' कथ्यते।
6. स्वतन्त्ररूपेण उच्चार्यमाणः वर्णः स्वरः कथ्यते।
7. ह्रस्वस्वराः पञ्चः सन्ति।
8. येषाम् उच्चारणे एकमात्रायाः कालः प्रयुज्यते।
9. दीर्घाः स्वराः अष्टः सन्ति।
10. येषाम् उच्चारणे द्विमात्रायाः कालः प्रयुज्यते, तेषाम् दीर्घ स्वरः कथ्यते।
11. येषाम् उच्चारणे द्विमात्रायाः अधिकः कालः प्रयुज्यते, तेषाम् प्लुत स्वरः कथ्यते।
12. यदा वयं कश्चित् दूरतः आह्वयामः तदा प्लुत स्वरस्य प्रयोगः भवति । यथा – ओ३म् इति
13. संस्कृत भाषायाम् (33) त्रयस्त्रिंशत् व्यञ्जनानि सन्ति।
14. येषाम् वर्णानाम् उच्चारणं स्वराणां सहायता भवति व्यञ्जनानि कथ्यन्ते।
15. वर्णानां समूहः वर्णमाला भवति।
16. पदानां समूहः वाक्यं भवति ।
17. वर्णानां संयोगेन पदस्य निर्माणं भवति।

❑❑

## पाठ–2 सन्धि–प्रकरणम्

1. **(i)** अ, **(ii)** ब, **(iii)** स, **(iv)** द, **(v)** अ।
2. **(i)** हिम + आलयः, **(ii)** स्वर, **(iii)** रामः + चिनोति, **(iv)** पुरः + हित, **(v)** व्यंजन संधेः।
3. दो वर्णों के परस्पर मेल को सन्धि कहते हैं ।
4. सन्धि के तीन भेद हैं– (i) स्वर सन्धि (ii) व्यञ्जन सन्धि (iii) विसर्ग सन्धि ।
5. (i) दो स्वरों के परस्पर मेल को स्वर सन्धि कहते हैं ।
   (ii) दो व्यञ्जन या वर्णों के परस्पर मेल को व्यञ्जन सन्धि कहते हैं ।
   (iii) विसर्ग का स्वर या व्यञ्जन के साथ मेल होने पर विसर्ग सन्धि होती है ।
6. (i) विद्यालयः (ii) महर्षिः (iii) महोत्सवः (iv) गिरीशः (v) भानूदयः (vi) जगदीशः (vii) हरिं वन्दे (viii) सूर्योदयः (ix) प्रत्येकम् (x) गंगौघः ।
7. (i) महा + ईश्वरः, गुण सन्धि, (ii) परम + उदारः, गुण सन्धि, (iii) सत् + चरित्रम्, व्यञ्जन सन्धि, (iv) गिरि + ईशः, दीर्घ सन्धि, (v) अहम् + वन्दे, मोऽनुस्वार,(vi) नमः+करोति, विसर्ग सन्धि, (vii) गंगा + उदकम्, गुण सन्धि, (viii) मही + ईशः, दीर्घ सन्धि, (ix) विष्णु + उदयः, दीर्घ सन्धि, (x) अच् + अन्तः, व्यञ्जन सन्धि ।
8. (i) हिमालयः, दीर्घ सन्धि (ii) रवीन्द्रः, दीर्घ सन्धि (iii) गुरूपदेशः, दीर्घ सन्धि (iv) पितृणम्, दीर्घ सन्धि (v) सुरेन्द्रः, गुण सन्धि (vi) नरेशः, गुण सन्धि (vii) लतेव, गुण सन्धि (viii) हितोपदेशः, गुण सन्धि (ix) गंगोदकम्, गुण सन्धि (x) महोर्जितम्, गुण सन्धि (xi) देवर्षिः, गुण सन्धि (xii) हरये, अयादि सन्धि (xiii) भवति, अयादि सन्धि (xiv) नायकः, अयादि सन्धि (xv) श्रावकः, अयादि सन्धि (xvi) ममैव, वृद्धि सन्धि (xvii) तथैव, वृद्धि सन्धि (xviii) मतैक्यम्, वृद्धि सन्धि (xix) महैक्यम्, वृद्धि सन्धि (xx) जलौघः, वृद्धि सन्धि (xxi) यद्यपि, यण् सन्धि (xxii) नद्यत्र, यण् सन्धि (xxiii) स्वागतम्, यण् सन्धि (xiv) वध्वागमनम् , यण् सन्धि (xxv) मात्राज्ञा, यण् सन्धि ।

❑❑

## पाठ-3 अव्यय–प्रकरणम्

1. (i) (ब), (ii) (स), (iii) (द), (iv) (अ), (v) (ब)।
2. (i) कुतः (ii) कदा (iii) कुत्र (iv) कथं (v) किम, (vi)प्रातः (vii) सर्वदा (viii) कदा (ix) अपि (x) अधुना।
3. (i) सर्वत्र (ii) ऋते (iii) अधः (iv) कुत्र (v) यत्र, तत्र (vi) यथा (vii) तथा (viii) आम् (ix) अत्र (x) अपि ।

❑❑

## पाठ-4 पर्यायवाची शब्दाः

1. (i) (स), (ii) (अ), (iii) (द), (iv) (अ), (v) (स)।
2. (i) मही, (ii) अचलः, (iii) अम्बरम्, (iv) अम्बु, (v) निर्झरिणी।
3. (i) भूमिः, अवनिः, मही ।
   (ii) गिरिः, महीधरः, अचलः ।
   (iii) नभः, व्योमः, अम्बरम् ।
   (iv) वारिः, नीरम्, अम्बु।
   (v) सरित्, निम्नगा, निर्झरिणी
   (vi) रविः, दिनकरः, भानुः।
   (vii) धनिन्, धनाढ्यः, धनशालिन्।
   (viii) तरुण, तलुन, वयस्थः।
   (ix) कुसुमम्, प्रसून, सुमुनम्।
   (x) करः, पाणिः, शयः।
   (xi) लोचनं, नयनं, ईक्षणं
   (xii) पक्षिन्, अंडजः, नीडजः।
   (xiii) अध्यापकः, गुरुः, उपाध्यायः।
   (xiv) शिखी, बर्हिणः, केकिन्।
   (xv) हरिः, हर्यक्षः, मृगेन्द्रः।
   (xvi) नक्र, झषाणां, घड़ियाल।
   (xvii) कलरवः, पारावतः, छदेः।
   (xviii) खनकः, उंदूरा, मूषिकार।
   (xix) धावकः, कर्मकीलकः, शौचेय
   (xx) तृणराजः, मधुरस, आसबद्रु ।

4.अलिः, मिलिन्दः, मधुपः
5. अग्नि का।

❑❑

## पाठ-5 विलोम शब्दाः

1. (i) (क), (ii) (ख), (iii) (ग), (iv) (क), (v) (घ)।
2. (i) पराजयः, (ii) शोकः (iii) दुष्कर (iv) दुर्जन।
3. (i) अवनति (ii) मूढ़ः (iii) सज्जनः (iv) दिनम् (v) प्रतिकूल (vi) अनादरः (vii) अग्रजः (viii) अहिंसा (ix) अनिष्ट (x) स्थूलः।

❑❑

## पाठ-6 लिङ्ग–विचारः

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (अ)।
2. (i) अजन्ताः, (ii) हलन्ताः, (iii) पुंल्लिग।
3. पुल्लिंङ्ग पदानि – घटः, लाभः, उष्ट्र, अनिलः, पटः।
4. स्त्रीलिङ्ग पदानि– गर्दभी, छात्रा, लता, अश्वा, विदुषी।
5. नपुंसकलिङ्ग पदानि – पर्णम्, द्वारम्, पुस्तकम्, नीडम्, गृहम्, सूत्रम्।
6. येषाम् शब्दानाम् अन्ते स्वराः भवन्ति ते अजन्ताः कथ्यन्ते।
7. येषाम् शब्दानाम् अन्ते व्यञ्जनानि भवन्ति ते हलन्ताः कथ्यन्ते।
8. ये शब्दाः पुरुषवाचकाः सन्ति ते पुंल्लिङ्गशब्दाः कथ्यन्ते।

❑❑

## पाठ–7 वचन–विचारः

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (ब), (vi) (अ)।
2. पञ्जराणि, पुस्तकानि, कङ्कतानि, छुरिकाः, जवनिकाः, शिक्षिकाः, मत्स्याः, दूरभाषाः, घटाः।
3. एकवचनानि पदानि— बालकः, वानरः, गजः, गायकः, घटः।
4. द्विवचनानि पदानि— शिक्षकौ, छात्रे, पत्रे, चटके, भल्लुकौ।
5. बहुवचनानि पदानि— लोकाः, हरयः, गुरवः।
6.

| एकवचनम् | द्विवचनम् | एकवचनम् | द्विवचनम् |
|---|---|---|---|
| चन्द्रः | चन्द्रौ | वृद्धा | वृद्धे |
| कपोतः | कपोतौ | मापिका | मापिके |
| मूषकः | मूषकौ | उपनेत्रम् | उपनेत्रे |
| रजकः | रजकौ | कमलम् | कमले |
| लता | लते | | |

7.

| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| पञ्जरम् | पञ्जराणि | पुस्तकम् | पुस्तकानि |
| कङ्कतम् | कङ्कतानि | छुरिका | छुरिकाः |
| जवनिका | जवनिकाः | शिक्षिका | शिक्षिकाः |
| मत्स्यः | मत्स्याः | दूरभाषः | दूरभाषाः |
| घटः | घटाः | | |

8. संस्कृतभाषायाम् त्रीणि वचनानि भवन्ति।

❑❑

## पाठ–8 पुरुष–विचारः

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (ब), (vi) (अ), (vii) (स), (viii) (द), (ix) (अ), (x) (ब), (xi) (स), (xii) (द), (xiii). (अ), (xiv) (ब), (xv) (स)।
2. (i) युवाम्, (ii) यूयम्, (iii) अहम्, (iv) आवाम्, (v) वयम्।
3. प्रथमपुरुष वाचकानि पदानि— कः, सः, तौ।
4. मध्यमपुरुष वाचकानि पदानि— त्वम्, त्वत्, त्वया, युष्मत्, यूयम्।
5. उत्तमपुरुष वाचकानि पदानि—मयि, अस्माभिः, अहम्।
6. यस्य विषये वार्तालापं कुरुते, सः प्रथम पुरुषः (अन्य पुरुषः) भवति।
7. कथकः (वक्ता) येन सह वार्तालापं करोति, सः मध्यम पुरुषः अस्ति।
8. वार्तालापस्य कर्ता वक्ता वा उत्तम पुरुषः भवति।

❑❑

## पाठ–9 विशेषण–विशेष्य सम्बन्धः

1. (i) (अ), (ii) (ब)
2. (i) श्वेत, (ii) द्वितीये, (iii) रक्त, (iv) प्रचुरं, (v) एकः।
3. नीलः, बहवः, बहूनि, विशालः, निर्धनः।
4. कन्यां, घटः, स्वभावः, वृक्षः, वाक्यः।

❑❑

## पाठ–10 संज्ञा शब्द–रूप प्रकरणम्

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (अ), (vi) (ब), (vii) (स), (viii) (द), (ix) (अ), (x) (ब)।
2. (1) (i) रामाः (ii) रामम् (iii) रामाभ्याम् (iv) रामाय (v) रामात् (vi) रामाणाम् (vii) रामेषु (viii) हे रामाः

   (2) (i) हरिः (ii) हरिम् (iii) हरिभिः (iv) हरये (v) हरेः (vi) हरीणाम् (vii) हरौ (viii) हे हरी!

   (3) (i) धीवराः (ii) धीवरान् (iii) धीवरेण (iv) धीवराय (v) धीवरेभ्यः (vi) धीवराणाम् (vii) धीवरे (viii) हे धीवराः!

   (4) (i) मती (ii) मतिम् (iii) मत्या (iv) मतिभ्याम् (v) मतिभ्यः (vi) मतीनाम् (vii) मत्याम् (viii) हे मतयः!

**(5)** (i) बालिका: (ii) बालिकाम् (iii) बालिकाभि: (iv) बालिकाभ्याम् (v) बालिकाया: (vi) बालिकयो: (vii) बालिकासु (viii) हे बालिके!

**(6)** (i) पति: (ii) पतीन् (iii) पतिभ्याम् (iv) पत्ये (v) पतिभ्य: (vi) पत्यो: (vii) पत्यौ (viii) हे पतय:!

**(7)** (i) चटका: (ii) चटकाम् (iii) चटकया (iv) चटकायै (v) चटकाया: (vi) चटकानाम् (vii) चटकायाम् (viii) हे चटका:!

**(8)** (i) वटव: (ii) वटुम् (iii) वटुभ्याम् (iv) वटवे (v) वटो: (vi) वटूनाम् (vii) वटुषु (viii) हे वटव:!

**(9)** (i) गुरव: (ii) गुरून् (iii) गुरुणा (iv) गुरवे (v) गुरो: (vi) गुरूणाम् (vii) गुरुषु (viii) हे गुरो!

**(10)** (i) दाता (ii) दातारम् (iii) दातृभि: (iv) दात्रे (v) दातृभ्य: (vi) दात्रो: (vii) दातरि (viii) हे दातारौ!

**3.**

| | | |
|---|---|---|
| (i) | (क) रामाय | (ख) हरीणाम् |
| (ii) | (क) कविषु | (ख) मत्या |
| (iii) | (क) नद्याम् | (ख) बालकौ |
| (iv) | (क) गुरो: | (ख) साधुभ्याम् |
| (v) | (क) पती | (ख) भूपतिना |
| (vi) | (क) मुनये | (ख) श्रीपते: |
| (vii) | (क) भानु: | (ख) सखायौ |
| (viii) | (क) सुधियम् | (ख) पितु: |
| (ix) | (क) कर्तृभि: | (ख) मातु: |
| (x) | (क) शत्रुभ्य: | (ख) गवि |
| (xi) | (क) भगवन्तम् | (ख) आत्मा |
| (xii) | (क) राज्ञो: | (ख) विदुष: |
| (xiii) | (क) भगवते | (ख) रमयो: |
| (xiv) | (क) मत्याम् या मतौ | (ख) स्तुत्या |
| (xv) | (क) नदीभ्य: | (ख) धेनूनाम् |
| (xvi) | (क) वध्वै | (ख) लक्ष्मय: |
| (xvii) | (क) स्त्रिया: | (ख) श्रीभ्य: |
| (xviii) | (क) फलम् | (ख) मधूनि |
| (xix) | (क) वारिणि | (ख) दध्ना |
| (xx) | (क) जगति | (ख) गृहाभ्याम् |

❑❑

## पाठ–11 सर्वनाम शब्द–रूप प्रकरणम्

**1.** (i) स (ii) ब (iii) द (iv) अ (v) द (vi) अ (vii) ब (viii) स (ix) द (x) अ।

**2.** (i) सर्वस्यै, (ii) एषु, (iii) अस्माकम् न:, (iv) भवन्तौ, (v) कस्यै, (vi) कौ।

**3.**

| | | |
|---|---|---|
| (i) | (क) मम, मे | (ख) युष्मान्, व: |
| (ii) | (क) तुभ्यम्, ते | (ख) भवत्यो: |
| (iii) | (क) भवत: | (ख) किम् |
| (iv) | (क) केषाम् | (ख) का: |
| (v) | (क) मयि | (ख) यस्मै |
| (vi) | (क) यासु | (ख) यानि |
| (vii) | (क) सर्वै: | (ख) सर्वेषाम् |
| (viii) | (क) सर्वाभ्याम् | (ख) इमौ |
| (ix) | (क) इमाम् | (ख) इदम् |
| (x) | (क) एतेभ्य: | (ख) एतौ |
| (xi) | (क) एतस्या: | (ख) स: |
| (xii) | (क) सा | (ख) तस्मै |
| (xiii) | (क) याभ्याम् | (ख) यासाम् |
| (xiv) | (क) यानि | (ख) भवत्याम् |
| (xv) | (क) भवतीभि: | (ख) वयम् |
| (xvi) | (क) माम्, मा | (ख) युवाम्, वाम् |
| (xvii) | (क) तस्या: | (ख) एतस्मिन् |
| (xviii) | (क) सर्वस्यै | (ख) एषु |
| (xix) | (क) अस्माकम् न: | (ख) भवन्तौ |
| (xx) | (क) कस्यै | (ख) कौ । |

❑❑

## पाठ–12 संख्यावाचक तथा क्रमवाचक शब्द:

**1.** (i) अ (ii) स (iii) ब (iv) द (v) अ (vi) स (vii) अ (viii) ब (ix) अ (x) अ।

**2.** (i) एक: (ii) त्रीणि (iii) द्वे (iv) शतम् (v) एक: (vi) पञ्च (vii) दश (viii) सप्त ।

**3.** (i) एकादश (ii) द्वाविंशति (iii) अष्टादश (iv) षोडश (v) एकाशीति (vi) सप्तति (vii) षट्षष्टि (viii) सप्ताशीति (ix) नवाशीति (x) षट्चत्वारिंशत् (xi) पञ्चदश (xii) पञ्चपञ्चाशत् (xiii) सप्तसष्टि

(xiv) नवदश, एकोनविंशति (xv) पञ्चविंशति (xvi) अष्टनवति (xvii) सप्तत्रिंशत् (xviii) नवत्रिंशत् (xix) पञ्चाशत् (xx) एकनवति (xxi) पञ्चाशीति (xxii) नवति (xxiii) नवनवति (xxiv) नवविंशति (xxv) द्विसप्तति (xxvi) षष्टि (xxvii) एकषष्टि (xxviii) नवषष्टि, एकोनसप्तति

4. (i) द्वात्रिंशत्तम (ii) षट्चत्वारिंशत्तम (iii) एकविंशतितम (iv) एकत्रिंशतम (v) एकचत्वारिंशत्तम (vi) एकादश (vii) द्वा चत्वारिंशत्तम (viii) अष्टम (ix) पञ्चम (x) पंचदश (xi) पञ्च चत्वारिंशत्तसम (xii) नवम (xiii) एकोनविंशतितम (xiv) नवविंशतितम (xv) नवत्रिंशत्तम (xvi) नवचत्वारिंशत्तम (xvii) अष्टचत्वारिंशत्तम (xviii) सप्तविंशतितम (xix) पञ्चविंशतितम (xx) सप्तदश।

5. (i) एका (ii) द्वे (iii) एका (iv) तिस्रः (v) एकया (vi) चतस्रः (vii) एकस्याः (viii) तिस्रः (ix) चतसृभ्यः (x) तिसृणाम्।

❑❑

## पाठ–13 धातु–रूप प्रकरणम्

1. (i) (द), (ii) (अ), (iii) (ब), (iv) (स), (v) (द)।

2. **1.**

| | | |
|---|---|---|
| (i) वदतः | (ii) वदसि | (iii) वदामः |
| (i) अवदत् | (ii) अवदतम् | (iii) अवदाम |
| (i) वदिष्यन्ति | (ii) वदिष्यथः | (iii) वदिष्यामि |
| (i) वदतु | (ii) वद | (iii) वदाम |
| (i) वदेयुः | (ii) वदेत | (iii) वदेव |

**2.**

| | | |
|---|---|---|
| (i) नमन्ति | (ii) नमथः | (iii) नमामि |
| (i) अनमत् | (ii) अनमत | (iii) अनमाम |
| (i) नस्यन्ति | (ii) नस्यथ | (iii) नस्यावः |
| (i) नमताम् | (ii) नमतम् | (iii) नमाम |
| (i) नमेयुः | (ii) नमेत | (iii) नमेयम् |

**3.**

| | | |
|---|---|---|
| (i) क्रीडन्ति | (ii) क्रीडथ | (iii) क्रीडामि |
| (i) अक्रीडत् | (ii) अक्रीडः | (iii) अक्रीडाम |
| (i) क्रीडिष्यतः | (ii) क्रीडिष्यथ | (iii) क्रीडिष्यावः |
| (i) क्रीडतु | (ii) क्रीडत | (iii) क्रीडाव |
| (i) क्रीडेताम् | (ii) क्रीडेतम | (iii) क्रीडेयम् |

**4.**

| | | |
|---|---|---|
| (i) रक्षन्ति | (ii) रक्षथः | (iii) रक्षामि |
| (i) अरक्षत् | (ii) अरक्षतम् | (iii) अरक्षाम |
| (i) रक्षिष्यन्ति | (ii) रक्षिष्यथ | (iii) रक्षिष्यामि |
| (i) रक्षतु | (ii) रक्ष | (iii) रक्षाम |
| (i) रक्षेयुः | (ii) रक्षेत | (iii) रक्षेव |

3.

| धातुः | लकारः | पुरुषः | वचन |
|---|---|---|---|
| अस् | लङ् लकारः | प्रथम पुरुष | एकवचन |
| कृ | लट् लकारः | प्रथम पुरुष | बहुवचन |
| आ+गम् | लङ् लकारः | प्रथम पुरुष | एकवचन |
| नि+ वस् | लट् लकारः | प्रथम पुरुष | बहुवचन |
| गम् | लृट् लकारः | प्रथम पुरुष | एकवचन |
| कृ | लङ् लकारः | प्रथम पुरुष | एकवचन |

❑❑

## पाठ–14 लकार–विचारः

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (अ)।

2.

| | | | |
|---|---|---|---|
| प्रथम पुरुष | पठति | पठतः | पठन्ति |
| मध्यम पुरुष | पठसि | पठथः | पठथ |
| उत्तम पुरुष | पठामि | पठावः | पठामः |

3. (i) होंगे (ii) (तुम्हें) बैठना चाहिए (iii) तुम (होंगे) (iv) (तुम) बैठोगे (v) (तुम सब) जाओगे (vi) देखो/(उसे) देखना चाहिए (vii) (मैं) जाऊँ (viii) (मैं) खेला (ix) (हम सब) देखेंगे (x) (तुम) खेलो।

4.

| क्रियापदानि | लकार | वचन | पुरुष |
|---|---|---|---|
| अनमत् | लङ लकारः | एकवचन | प्रथम पुरुषः |
| पठति | लट् लकारः | एकवचनम् | प्रथम पुरुषः |
| वदिष्यन्ति | लृट् लकारः | बहुवचनम् | प्रथम पुरुषः |
| विचरन्ति | लट् लकारः | बहुवचनम् | प्रथम पुरुषः |
| भ्रमन्ति | लट् लकारः | बहुवचनम् | प्रथम पुरुषः |
| अवदत् | लङ् लकारः | एकवचनम् | प्रथम पुरुषः |
| अभवत् | लङ् लकारः | एकवचनम् | प्रथम पुरुषः |
| अगच्छत् | लङ् लकारः | एकवचनम् | प्रथम पुरुषः |
| कुर्वः | लट् लकार | द्विवचनम् | उत्तम पुरुषः |
| करोति | लट् लकार | एकवचनम् | प्रथम पुरुष |

5. (i) अस् (ii) कृ (iii) भू (iv) दृश्–पश्य (v) भ्रम् (vi) चिन्त् (vii) कृ (viii) दा (ix) वद् (x) पत्।

6. (i) करिष्यति (ii) गमिष्यति (iii) भविष्यति (iv) गायिष्यति (v) रचिष्यति (vi) लेखिष्यति (vii) दृक्ष्यति (viii) प्रविष्यति (ix) चलिष्यति (x) वदिष्यति

❑❑

## पाठ–15 कारक–प्रकरणम्

1. (i) (अ), (ii) (ब), (iii) (स), (iv) (द), (v) (अ)।
2. (i) प्रयाग:, (ii) अभित:, (iii) बालकाय, (iv) कलमेन, (v) गोषु।
3. वाक्य में जिसका क्रिया से सीधा संबंध हो उसे कारक कहते हैं।
4. कारक छ: होते हैं। कर्ता, कर्म, करण, सम्प्रदान, अपादान तथा अधिकरण।
5. (i) अलग होने पर जो कारक स्थिर होता है उसकी अपादान संज्ञा होती है। अपादान में पंचमी विभक्ति होती है।
   (ii) सह के योग में तृतीया विभक्ति होती है ।
   (iii) नम: के योग में चतुर्थी विभक्ति होती है (जिसे नमस्कार किया जाये ।)
   (iv) परित: के योग में द्वितीया विभक्ति होती है ।
   (v) रुच् धातु के योग में चतुर्थी विभक्ति होती है ।
   (vi) किसी वस्तु के आधार के योग में सप्तमी विभक्ति होती है ।
6. 'धिक्' के योग में द्वितीया विभक्ति होती है ।
7. क्रिया की सिद्धि में अत्यन्त उपकारक साधन को करण कारक कहते हैं ।
8. 'चतुर्थी', दा धातु के योग में चतुर्थी विभक्ति होती है।
9. जिससे सम्बन्ध का बोध होता है, उसमें षष्ठी विभक्ति होती है।

❑❑

## पाठ–16 अनुवाद–प्रकरणम्

**(i)** (1) बालक: धावति । (2) बालकौ पठत:। (3) त्वं गच्छसि। (4) छात्र: पश्यति। (5) त्वं पश्यसि (6) अहं पठामि(7) त्वं जलं पिबसि (8) मयूर: नृत्यति (9) बालक: चित्रं पश्यति (10) स: पत्रं लिखति (11) युवाम् गृहं गच्छथ: (12) अहं जलं पिबामि (13) सीता वनं गच्छति (14) सिंह: वने धावति ।

**(ii)** (1) त्वं विद्यालयम् अगच्छ: (2) अहं जलम् अपिबम् (3) अहं रामायणम् अपठम् (4) बालक: राजमार्गे अध ाावत् (5) स: प्रश्नम् अपृच्छत् (6) बालक: सिंहम् अपश्यत् (7) बालक: अश्वात् अपतत् (8) शिष्य: प्रश्नम् अपृच्छत् (9) रमा पत्रम् अलिखत् (10) अहं निबन्धं अलिखम् (11) स: पुस्तकं अचोरयत् (12) वानर: वृक्षे अतिष्ठत् ।

**(iii)** (1) बालक: राजमार्गे धाविष्यति (2) छात्र: पुस्तकं पष्ठियति (3) अहं प्रयागं गमिष्यामि (4) मोहन: पत्रं लिखिष्यति (5) राम: दुग्धं पास्यति (6) वयम् वाराणसी नगरं गमिष्याम: (7) त्वं इदम् कार्यं करिष्यसि (8) स: असत्यं न वदिष्यति (9) आवां पुस्तकं पठिष्याव: (10) चौर: धनं चोरयिष्यति (11) स: स्नानं करिष्यति (12) छात्रा: पाठं पठिष्यन्ति ।

**(iv)** (1) सर्वदा सत्यं वद (2) देशस्य रक्षां कुरु/देशं रक्ष (3) युवाम् पाठं पठतम् (4) परस्परं कलहं मा कुरुतम् (5) आगच्छ पठ च (6) त्वं धाव (7) स: पत्रं लिखतु (8) ते उपवने धावन्तु (9) त्वं विद्वांसम् भव (10) ते प्रश्नं पृच्छन्तु (11) भृत्य: स्व कार्यं करोतु (12) बालका: पुष्पं आनयन्तु।

**(v)** (1) माता कथां कथयेत् (2) ते ग्रामं न गच्छेयु: (3) त्वं स्वच्छं जलं पिबे: (4) ते भोजनं कुर्यु: (5) ते न हसेयु: (6) त्वं स्व पाठं स्मरेत (7) निर्धनाय वस्त्रं दद्यात् (8) वयं असत्यं न वदेम ।

**(vi)** (1) त्वं कथं न गच्छसि ? (2) ते श्व: जयपुर गमिष्यन्ति (3) अहं रामायणं अपठम् (4) मोहन: पुस्तकं पठति (5) बालिका: क्रीडन्ति (6) ते धावन्ति (7) सीता एकं चित्रं पश्यति (8) वयम् गुरुम् नमाम: (9) शिष्य: प्रश्नं अपृच्छत् (10) बालक: अश्वात् अपतत् ।

❑❑

## पाठ-17 समयलेखनम्

1. (i) सार्ध षड् (ii) पादोनाष्ट (iii) सपादाष्ट (iv) एकादश
2. (i) पंचवादने (ii) सार्ध पञ्चवादने (iii) सपाद षष्ट वादने (iv) चतुर्दशपलोत्तरषष्टवादने
3. (i) षष्ट (ii) अष्ट (iii) त्रिंशतपलोत्तरत्रि

❑❑

## अपठितावबोधनम्

## ● अपठित गद्यांशः

(1) 1. (क) नृप। (राजा) (ख) पशवः।
2. (क) मक्षिका नृपस्य नासिकायाम् उपाविशत् ।
(ख) प्रहारस्य नृपस्य नासिका छिन्ना अभवत् फलम् अभवत् ?
3. (क) (ब) वानरः (ख) (अ) सुप्तः।

(2) 1. (क) जम्बूवृक्षः
(ख) वानरः
2. (क) वानरः प्रतिदिनं जम्बूफलानि खादति स्म।
(ख) जम्बूफलानि खादित्वा मकरस्य जाया अचिन्तयत्- 'अहो यः प्रतिदिनमीदृशानि मधुराणि फलानि खादति, नूनं तस्य हृदयमपि मधुरं भविष्यति ।'
3. (क) (द) अभवत्। (ख) (ब) मधुराणि।

(3) 1. (क) जलाशयम्, (ख) पिपासया।
2. (क) घटे स्वल्पं जलम् आसीत्, अतः काकः जलं पातुम् असमर्थः आसीत् ।
(ख) उद्यमस्य प्रभावेण काकः जल पातुं सफलः अभवत् ।
3. (क) (स) जलम् (ख) (ब) स्वल्पम्।

(4) 1. (क) भोजः (ख) दानशीलता।
2. (क) एकदा माघस्य पत्नी एकां कविताम् आदाय भोजसमीपे अगच्छत् तदा भोजः तस्यै प्रभूतं धनम् अददात् ।
(ख) सा सर्वं धनं याचकेभ्यः वितरितवती।
3. (क) (अ) राजा भोजः (ख) (अ) दानशीलता।

5- 1. (क) ऋषयः (ख) वैरभावम्।
2. (क) तत्र मृगसिंहशिश्वोः कदापि कलहः न अभवत्
(ख) ऋषीणां तपसः प्रभावात् आश्रमस्य पशुपक्षिणश्च तत्र निर्भयं विचरन्ति स्म ।
3. (क) (स) वसन्ति स्म (ख) (अ) पवित्रम्।

❑❑

## रचना

## पाठ-1 पत्र-लेखनम्

(1)

सेवायाम्,
श्रीमन्तः प्रधानाध्यापक महोदयः
महाराजा बदनसिंह उ. प्रा. विद्यालयः,
भरतपुरम् ।

**विषयः–** शिक्षणशुल्कमुक्तये प्रार्थना-पत्रम् ।

महोदयः,

सविनयं प्रार्थये यदहं श्रीमन्तः विद्यालये सप्तम् कक्षायाः छात्रोऽस्मि। मम पितुः आर्थिकस्थितिः शोचनीयाऽस्ति। मम पिता वृद्धोऽस्ति, प्रतिदिवसं कार्ये पञ्चाशद् रूप्यकाणाम् अर्जनमेव भवति । तेन परिवारस्य पालन-पोषणञ्च कथमपि भवितुं न शक्नोति । अतः अहं विद्यालयस्य शिक्षणशुल्कं प्रदातुम् असमर्थोऽस्मि । गतवर्षे मम शिक्षणशुल्क-मुक्तिः आसीत् । पञ्चम कक्षायाः परीक्षायाम् अहं प्रथमश्रेण्याम् उत्तीर्णोऽभवम् ।

अतः पुनः निवेदनमस्ति यत् भवन्तः अध्ययने मम रुचिं विलोक्य मह्यं शिक्षण-शुल्कात् मुक्ति प्रदाय अनुग्रहीष्यन्ति।

दिनांक: 5-7-20_ _ ई. भवदाज्ञाकारी शिष्य:
सुरेशचन्द्र:
कक्षा 6 (स)

(2)
सेवायाम्,
श्रीमन्त: प्रधानाचार्यमहोदय:
राजकीय: उच्च माध्यमिक विद्यालय:
जोधपुरम् ।
**विषय:**–दिनद्वयस्य **अवकाशार्थं** प्रार्थनापत्रम् ।
महोदय:,
सविनयं निवेदनम् अस्ति यत् मम ज्येष्ठभ्रातु: पाणिग्रहणसंस्कार: 28-11-20_ _ दिनाङ्के निश्चित:। एतत् कारणात् दिनद्वयं यावद् अहं स्वकक्षायामुपस्थातुं न शक्नोमि ।
अत: निवेदनमस्ति यत् 28-11-20_ _ दिनाङ्कत: 29-11-20_ _ दिनाङ्क पर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम अनुग्रहीष्यन्ति श्रीमन्त: ।
सधन्यवादम् ।
दिनाङ्क: 28-11-20_ _ भवदीय: शिष्य:
भारत: शर्मा:
(कक्षा 6)

(3) सेवायाम्,
श्रीमन्त: प्रधानाध्यापकमहोदय:
राजकीय: उच्चप्राथमिकविद्यालय:
अजयमेरू: ।
विषय:–दिनत्रयस्य अवकाशार्थं प्रार्थना-पत्रम् ।
महोदय:,
सविनयं निवेदनम् अस्ति यत् मम माता गतदिवसात् शीतज्वरेण पीड़िता अस्ति । एतस्मात् कारणात् अहं विद्यालयम् आगन्तुं न शक्नोमि।
कृपया 8-10-20_ _ दिनांकत: 10-10-20_ _ दिनांकपर्यन्तं दिनत्रयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति श्रीमन्त: ।
सधन्यवादम् ।
दिनांक: 8-10-20_ _ भवदाज्ञाकारी शिष्य:
रमन:
(कक्षा 6)

(4) सेवायाम्,
श्रीमन्त: प्रधानाचार्यमहोदय:
राजकीय: उच्चमाध्यमिकविद्यालय:,
दौसानगरम् ।
विषय-स्थानान्तरण-प्रमाण प्रत्रं प्राप्तुं प्रार्थना-पत्रम् ।
महोदय:,
सविनयं निवेदनम् अस्ति यत् मम पिता अत्र लिपिक: अस्ति। अधुना तस्य स्थानान्तरणं भरतपुरम् अभवत् । मम परिवार: मम पित्रा सह भरतपुरं गमिष्यति। अहम् अस्मात् विद्यालयात् षष्टकक्षाम् उत्तीर्णवान् सप्तकक्षायाम् अहं भरतपुरे पठिष्यामि। अत: मह्यं स्थानान्तरण-प्रमाण-प्रत्रं प्रदाय अनुग्रहीष्यन्ति भवन्त: इति ।
सधन्यवादम् ।
दिनांक: 15-7-20_ _ भवदाज्ञाकारी शिष्य:
रामकुमार:
(कक्षा 6)

(5) सेवायाम्,
श्रीमन्त: प्रधानाचार्यमहोदय:,
राजकीय: उच्चमाध्यमिकविद्यालय:,
जोधपुरम् ।
**विषय:**-क्रीडाया: सम्यग् व्यवस्थायै प्रार्थना-पत्रम् ।
महोदय:,
सविनयं निवेद्यते यदस्माकं विद्यालये क्रीडाया: व्यवस्था भद्रतरा न वर्तते । अध्ययनेन समम् एव क्रीडनमपि अस्मभ्यं रोचते । अत: क्रीडाया: सम्यग् व्यवस्थां विधाय अस्मान् अनुग्रह्णन्तु श्रीमन्त: ।
सधन्यवादम् ।
दिनांक: 25-7-20_ _ भवदाज्ञाकारी शिष्य:
हरीश:
(कक्षा 6)

(6) सेवायाम्,
श्रीमन्त: प्रधानाध्यापक महोदय:,
रा. उ. प्रा. विद्यालय:, श्रीकरनपुर ।
**विषय:**- विद्यालये स्वच्छताया: व्यवस्थायै प्रार्थना-पत्रम् ।
महोदय:,
सविनयं निवेदयामो यद् अस्माकं विद्यालये सम्प्रति अस्वच्छताया: साम्राज्यं वर्तते । अस्मिन् वातावरणे छात्रा: शिक्षकाश्च रोगग्रस्ता जायन्ते। अध्ययने अस्माकं मनांसि न रमन्ते । अत: कृपया स्वच्छताया: समुचित-व्यवस्थायै कर्मकरान प्रेरयन्तु अत्रभवन्त: ।
दिनांक: 28-8-20_ _ भवताम् आज्ञानुवर्ती
समस्त: छात्रवृन्द:

(7) सेवायाम्,
श्रीमन्तः प्रधानाध्यापक, महोदयः,
राजकीयः उच्चप्राथमिक विद्यालयः,
बीकानेरम् ।

**विषयः**–शैक्षिक–शिविरस्य आयोजनार्थं प्रार्थना–पत्रम् ।

महोदयः,

सविनयं निवेद्यते यद् अस्मद्विद्यालये शिक्षण–व्यवस्था पूर्णसन्तोषकरी वर्तते। तथापि अस्माकं ज्ञान–पिपासा तृप्तिं न एति। अतः प्रार्थयामो वयं यद् अस्मत्–कृते 15 दिनात्मकम् एकं शैक्षिक–शिविरम् आयोज्य अनुग्रहणन्तु श्रीमन्तः।

दिनांकः 18-11-20_ _ भवदाज्ञाकारिणः शिष्याः
षष्टम् कक्षास्थाः छात्राः

(8) प्रिय अनुज ! ब्यावर (अजयमेरु)
चिरंजीव । दिनांकः 03-10-20_ _
अत्र कुशलम् तत्रास्तु ।

तव एकेन मित्रेण सूचितम् यत् स्वशिक्षकैः सह तव व्यवहारः शिष्टः न अस्ति । सहपाठिषु अपि त्वम् असाधुः संवृत्तः अस्ति। इदं नोचितम्। सदाचारस्तु जीवनम् मूलमन्त्रोऽस्ति । कथितं च आचारः परमो धर्मः इति । आशासे यत् त्वं मम परामर्शम् अनुसरिष्यसि।

चि. सुरेन्द्रनाथः, कक्षा 6 (स) तवाग्रज
राजकीय सी. सै. स्कूल, बाड़मेर । राजेन्द्रनाथः

(9) प्रिय मित्र श्याम ।
नमस्कारः
अत्र कुशलं तत्रास्तु ।

मम वार्षिकी परीक्षा मार्च मासस्य पंचविंशतितमे दिनांके समाप्तिम् गता। परीक्षानन्तरम् अहम् शीघ्रमेव गृहं प्रति प्रस्थास्यामि ग्रीष्मावकाशे च गृहे एव स्थास्यामि। त्वं गृहं कदा आगमिष्यसि? शीघ्रं सूचय। अहम् त्वाम् औत्सुक्येन प्रतीक्षिष्ये।

दिनांकः 27-07-20_ _ भवदीयः
राजेशः
रा. उ. प्रा. विद्यालयः शाहपुरा (भीलवाड़ा)

(10) पूज्येषु मातृचरणेषु, 56, आर्यनगर, बून्दीतः
सादरं वन्दे । दिनांकः 9-9-20_ _

भवदीयं कृपापत्रम् मया अद्य लब्धम्। अहम् अत्र सर्वथा प्रसन्नोऽस्मि। पूज्येन पित्रा प्रेषितेन धनेन मम निर्वाहः सुखेन सम्पद्यते। किन्तु पाठ्य–विषयाणाम् विशिष्टा अध्ययनाय केषाञ्चित् अतिरिक्त पुस्तकानाम् क्रयणम् आवश्यकम् अस्ति। एतदर्थं चाहं पञ्चाशत् रुप्यकाणि अपेक्षे। एतद्धनम् अविलम्बं धनादेश–माध्यमेन प्रेषयतु इति पित्रे निवेदनीयम्। पितृचरणाभ्याम् मे प्रणामाञ्जलिः स्वीकार्या। अनुजादिकाश्च मे चिरंजीवस्तु इति अभिलषन्।

प्रतिष्ठायाम् भवत्याः स्नेहभाजनम्
आरती राकेशः
निहालगंज, धौलपुरम् ।

❑❑

## पाठ–2 चित्राधारित वर्णनम्

(1) 1. अस्मिन् चित्रे वयं नृत्यशालां पश्यामः ।
2. अत्र द्वे बालिके नृत्यतः ।
3. शिक्षिका ते नृत्यं शिक्षयति ।
4. ते प्रतिदिनं गृहात् आगच्छतः नृत्यस्य अभ्यासं च कुरुतः।
5. अत्र ते नृत्यं कुरुतः ।

(2) 1. एतस्मिन् चित्रे एकः जलाशयः रमणीयः पर्वतः च स्तः ।
2. जलाशये वर्तिकाः तरन्ति ।
3. जलाशयस्य तटे बहवः वृक्षाः सन्ति ।
4. अत्र शीतलवायुः प्रवहति ।
5. जलाशयस्य दृश्यं मनोरमम् अस्ति ।

(3) 1. इदम् मम गृहम् अस्ति।
2. गृहं सर्वतः सुन्दरवृक्षाः सन्ति।
3. वृक्षेषु बहूनि पुष्पाणि भवन्ति।
4. मम गृहे मन्दिरम् अस्ति।
5. वयं प्रातःकाले तत्र पूजां कुर्मः।

(4) 1. वृक्षाः अस्माकं मित्राणि सन्ति।
2. वृक्षैः पर्यावरणं शुद्धं भवति।
3. वृक्षैः भूमेः रक्षणं भवति।
4. वृक्षारोपणम् अस्माकं कर्त्तव्यम्।
5. प्रतिवर्षं वर्षाकाले जनाः वृक्षारोपणं कुर्वन्ति।

(5) 1. इदं नद्याः चित्रम् अस्ति।
2. नदीम् उभयतः वृक्षा सन्ति।

3. वृक्षेषु पादपेषु च खगा: कूजन्ति तिष्ठत्ति च।
4. खगा: मधुरं गायन्ति।
5. नदी-जलं कल-कल स्वरेण प्रवहति।

(6) 1. इदं चित्रं शिशु-मात्रो: स्नेहस्य अस्ति।
2. अत्र एक: शिशु: अस्ति।
3. माता शिशुं स्नेहेन पश्यति।
4. शिशु: मातु: अङ्के स्वपिति।
5. माता प्रसन्ना भवति।

(7) 1. अस्मिन् चित्रे ग्रामस्य एक तडाग: अस्ति।
2. तडागस्य तटे एक: विशाल वृक्ष: तिष्ठति।
3. तथा अनेके बालका: क्रीडन्ति।
4. तडागस्य जले बालका:, युवका: वृद्धा:, च स्नानं कुर्वन्ति।
5. पशव: अपि जलं पिवन्ति, खगा: च कूजन्ति।

❑❑

## पाठ-3 लघु कथा लेखनम्

### 1. सिंहमूषकयो: कथा

कस्मिंश्चिद् वन-प्रदेशे एक: सिंह: प्रतिवसति स्म। एकदा स: वृक्षस्य छायायां स्वपिति स्म। तस्य वृक्षस्य अधस्तात् एक: मूषक: बिलं कृत्वा वसति। स: मूषक: बिलात् निस्मृत्य सुप्तस्य सिंहस्य पृष्ठमारुहय तस्य केशान् कृन्तति स्म। जागृत: सिंह: मूषकं हस्ते गृहीत्वा अवदत् 'कोऽसि? कथं मे केशान् कृन्तति? अहं त्वां हनिष्यामि। मूषकोऽपि भीत: सन् न्यवेदयत्—अहं छुद्रमूषक: सन् अपि भवतां सहाय्यं कर्तु प्रतिज्ञां करोमि। दयार्द्र सिंह: तम् उपहसन् अत्यजत्।

एकदा सिंह: बधिकै: पाशे निबद्ध:। स उच्चै: अगर्जत्। मूषक: सिंहमापन्नं ज्ञात्वा तत्रैव प्राप्नोत्। स: तस्य जालं छित्वा तं पाश मुक्तम् अकरोत्। मुक्त: सिंह: मूषकेन सह मैत्रीं विधाय स्वच्छन्दं विचरति स्म।

### 2. चतुर: श्रृगाल:

कस्मिंश्चिद् वन-प्रदेशे एक: व्याघ्र: वसति स्म। एकदा असौ बधिकेन पञ्जरे बद्ध:। व्याघ्र: पाशे खिन्न: सन् स्थित:। ततोऽसौ मार्गे विप्रमेकं गच्छन्तम् अपश्यत्। व्याघ्र: ब्राह्मणाय न्यवेदयत्—'मां मोचय।' दयार्द्र: ब्राह्मण: व्याघ्रे दयमान: तं मोचयित्वा सहाय्यमकरोत्। परञ्च हिंसक: व्याघ्र: तु कृतघ्न: आसीत्। स: विप्रं खादितुमैच्छत् विप्र: तं स्वजीवनं याचमान: न्यवेदयत्—'हे मृगराज! मा माम् व्यापदय माम् मा भक्षय। कृतज्ञो भव। परञ्च निर्दय: व्याघ्र: नाश्रृणोत्। तदैव तत्र एक: श्रृगाल: आगच्छत्। सोऽवदत्—नाहं मन्ये यत् त्वं विशालकाय: अस्मिन् लघु पञ्जरे बद्ध: आसीत्। अत: पुन: प्रविश्य मां दर्शय व्याघ्र: यावत् पुन: प्रविश्य दर्शयति तावत् श्रृगाल: कपाटं व्यपदघात्। एवं व्याघ्रं पञ्जरे पुन: निक्षिप्य विप्रं रक्षति।

### 3. चतुर: गर्दभ:

कस्यचिद् मनुष्यस्थ गृहे एक गर्दभ: आसीत्। स: तस्य पृष्ठे लवणम् नयति स्म। स: सदैव नद्या: पारं नयति। एकदा जलमध्ये तस्य पादम् अस्खलत्। स: जले अपतत्। लवण: जले विलीयते स्म। गर्दभ: इदं तथ्यम् अजानत्। यत् यथा यथा लवण: जले विलीयते तथा तथा एव भारमपि अल्पताम् आप्नोति। एतद् ज्ञात्वा गर्दभ: नित्यमेव सरित: जले पतति भारं च अल्पतरम् करोति। एकदा स: मनुष्य तस्य पृष्ठे तूलं (कर्पासं) अनयत्। गर्दभ: नित्यमिव जले अपतत्। जलं संग्रहणात् तस्य भारमतितरमभवत्। भारस्य आधिक्यात् गर्दभ: उत्थातुमपि असमर्थो अपतत्। यत्नेन उत्थाय अपि चलितुमसमर्थ: अजायत्। असमर्थो असौ भारेण पीड़ित: स्वामिना प्रताड़ित: ताडित:। वराक: गर्दभ: धूर्तताम् अत्यजत्।

### 4. गज सौचिकयो: कथा

केनचिद् मनुष्येण एक: गज: पालित: आसीत्। स: जलं पातुं स्नातुं च नित्यमेव नद्यास्तटं गच्छति स्म। मार्गे एकस्य सौचिकस्य आपणि आसीत् । स: तस्मै किमपि खादितुं यच्छति स्म। स: वस्त्राणि सीसति स्म। आपणेऽनेकानि स्यूतानि वस्त्राणि अवलम्बितानि आसन्। एकदा असौ सौचिक: परिहासे गजस्य करे सूचिम् अभिनत्। क्रुद्ध: सन् गज: नद्या: तटमगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकीये करे (शुण्डे) पङ्किलं जलमानयत्। सौचिकस्यापणमागत्य नव स्यूतेषु महार्धेषु वस्त्रेषु असिंचत्। सौचिक: किमपि न कर्तुमशक्नोत्। पश्चात्ताप निमग्नोऽसौ गजं क्षमामयाचत। आत्मग्लानिमनुभूय अति खिन्नोऽभूत्।

### 5. लुब्ध: जम्बुक:

एक: बधिक: आसीत्। स: वनम् उपवसति स्म। मांस लुब्धोऽसौ व्याध: एकदा धनुरादाय मृगयार्थ मृगमन्विष्यन् काननान्तरम् अगच्छत्। तत्र तेनै को मृग: व्यापादित:। मृगमादाय गच्छता तेन घोराकृति: शूकरो दृष्ट:। स: मृगं भूमौ निधाय शरेण शूकरमहनत्। शूकर: गर्जनं कुर्वाण पादाघातेन तमाहतवान्। व्याध: हत: छिन्न द्रुम इव पपात। तस्य पादस्खलितेन एक

सर्पः अपि मृतः। मृते व्याधे तत्रागत एकः श्रृगालः। सः तान् मृतानवलोक्य प्रसन्नोऽभवत्। सोऽचिन्तयत–'अहो ! भाग्यम्, अद्य महद् भोजनं मे समुपस्थितम्। अद्य तु धनुलग्नं स्नायुबन्धनमेव खादामि।' एवं कुर्वन्नसौ छिन्ने स्नायुबन्धने द्रुतम् उत्प्लुतेन कोरण्डेन हृदिभिन्नः श्रृगालः पञ्चत्वं गतः। ❑❑

## पाठ–4 कथाक्रम–संयोजनम्

(1) 1. एकः पिपासितः काकः आसीत्।
2. सः वने एकं घटम् अपश्यत्।
3. घटे जलम् अल्पम् आसीत्।
4. तस्य मस्तिष्के एकः विचारः समागतः।
5. सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।
6. जलं पीत्वा काकः ततः अगच्छत्।

(2) 1. एकस्मिन् वने एकः सिंहः वसति स्म।
2. एकदा सः जाले बद्धः।
3. सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।
4. तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।
5. मूषकः परिश्रमेण जालम् अकृन्तत्।
6. सिंहः जालात्–मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

(3) 1. एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।
2. सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।
3. तदाः सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।
4. स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।
5. सः कुक्कुरः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।
6. तदा तस्य मुखस्थ रोटिका अपि जले पतति।
7. अत एव कथ्यते 'लोभः न करणीयः।'

(4) 1. एकः बुभुक्षितः श्रृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
2. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
3. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।
4. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।
5. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
6. "एतानि द्राक्षाफलानि अम्लानि" इति उक्त्वा कुपितः श्रृगाल ततः गतः।

(5) 1. एक गजः आसीत्।
2. सः जलं पातुं स्नातुं च प्रतिदिनम् सरितः तटम् अगच्छत्।
3. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
4. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पङ्किलं जलम् आनयत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।

❑❑

## पाठ–5 अनुच्छेद लेखनम्

### 1. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

एत्स्मिन् जगति जननी जन्मभूमिश्च एव सर्वोत्तमे भवतः बालकस्य कृते एते एव अतीव महत्त्वपूर्णे भवतः । सर्वे मानवाः जानन्त्येव यत् मातरि मातृभूमौ च यादृशं स्नेहं भवति न तादृशमन्यस्मिन् कस्मिन्नपि वस्तूनि। यत्र–कुत्रापि गत्वा नानाविधानि सुखानि च लब्ध्वा अपि मानवः! स्वजन्मभूमिं स्मरत्येव, कथं न स्मरिष्यति भवति हि स्वाभाविकौ स्नेहः तस्य। सर्वस्यापि स्वदेशे स्वाभाविकोऽनुरागः जायते । अस्माकं मातृभूमिः भारतदेशोऽस्ति। देवाः अपि अतः जन्म कांक्षन्ते। 'दुर्लभं भारते जन्म' इत्यपि कथयन्ति। रामकृष्णादयः परमेश्वराः अत्रैव जन्म लेभिरे। अत्र सर्वत प्रकृतेः मधुरतराणि दृश्यानि सन्ति। हिमालयस्य महात्म्यं केन न ज्ञायते। रत्नाकरः दिक्षु अस्यैव माहात्म्यम् उद्घोषयति, चरणौ च प्रक्षालयति। अयं देशः देवानामपि चित्ताकर्षको वर्तते।

### 2. साहसी बालिका लक्ष्मीबाई

एकदा एका बालिका पित्रा सह मेलकं द्रष्टुं नगरं प्रति गच्छति स्म । 'मार्गे' एका नदी आसीत्। सा नौकया गच्छति स्म। नौकायाम् अनेके जनाः आसन्। नद्याम् एकः मकरः आसीत्। तत्र द्वौ जनौ तस्मात् मकरात् भीतौ जले पतितो। तयोः मुखे भयस्य छाया आसीत्। सा अपि भीता आसीत् परन्तु सा अचिन्तयत्– ''तयोः जनयोः रक्षणं कथं करणीयम्?'' सा जले तयोः जनयोः

हस्तौ गृहीत्वा नौकां प्रति आनयत्। सा तयोः रक्षणम् अकरोत्। सा साहसी बालिका लक्ष्मीबाई आसीत्। एतस्मै बालिकायै नमः।

### 3. मम प्रियं पुस्तकम्

रामायणम् मम प्रियं पुस्तकम् अस्ति। एतत् न केवलं धार्मिक ग्रंथ अपितु ऐतिहासिकं महाकाव्यं अस्ति। अस्य कर्ता महाकविः वाल्मीकिः अस्ति । रामायणम् आदिकाव्यम् अस्ति, भगवान् वाल्मीकिः च आदिकवि अस्ति। रामायणे रामस्य परमपावनी कथा वर्तते। रामस्य चरितम् आदर्शः अस्ति। श्रीरामः मर्यादापुरुषोत्तम आसीत्। अतः रामायणे पितृभक्तिः, भ्रातृप्रेम, आदर्शराज्यम्, पुत्रवात्सल्यम्, पत्नी प्रेम पातिव्रत्यम्, इत्यादयः महान्तः आदर्शाः प्रस्तुता सन्ति । एतत् महाकाव्यं संसारस्य महत् कल्याणकरम् अस्ति। अतः संस्कृतभाषायाम् अतीव्।

### 4. विद्यालस्य वार्षिकोत्सव

अस्माकं विद्यालयः राजकीयः विद्यालयः अस्ति। अत्र पठनस्व तु श्रेष्ठा व्यवस्था अस्ति एव युगपदेव क्रीडानामपि सुलभा व्यवस्था अस्ति। अतएव अस्माकं विद्यालयस्य सर्वासां कक्षाणां परिणामः शतप्रतिशतं भवति। क्रीडानां प्रतियोगितासु अपि अस्माकं विद्यालयस्य छात्राः बहून पुरुस्कारान् अलभन्त । अस्माकं विद्यालस्य वार्षिकोत्सवः परह्यः सम्पन्नो जातः। अस्माकं प्रदेशस्य राज्यपालः मुख्यातिथिः आसीत्। यदैव मुख्यातिथिः द्वारं सम्प्राप्तः छात्राः वाद्ययन्त्राणां ध्वनिना तस्य स्वागतमाचरन्। ततः सः मञ्चस्य आसनं भूषितवान्।

❑❑

## पाठ-6 संकेताधारिताः वार्त्तालापः

### (1) कक्षायां छात्राणां सम्भाषणम्

प्रदीपः — अरुण ! भवतः गणितपुस्तकं ददाति किम् ?

अरुणः — भवान् किमर्थं विद्यालयं नागतवान् ?

प्रदीपः — मम अतीव शिरोवेदना आसीत्। अतः शयनं कृतवान्।

अरुणः — संस्कृतपुस्तकं भवान् इतोऽपि न दत्तवान्। इदानीं गणितपुस्तकमपि नयति, कदा प्रतिददाति ?

प्रदीपः — श्वः सायङ्काले भवतः पुस्तकं दास्यामि।

ज्योतिः — प्रदीप ! भवान् असत्यं वदति किम् ? श्वः भवान् बन्धुगृहे गमिष्यति। परश्वः आगमिष्यति। कदा गणितं लेखिष्यति ?

प्रदीपः — अहं विस्मृतवान्। परश्वः निश्चयेन पुस्तकं दास्यामि।

कृष्णः — ज्योति ! अद्य मम गृहम् आगच्छतु। सम्यक् पठिष्यावः।

अरुणः — भवान् पठिष्यति, लेखिष्यति इति वदति केवलम्।

कृष्णः — शिक्षिका श्वः संस्कृतपाठं पाठयिष्यति। द्वितीयपाठस्य प्रश्नान् प्रक्ष्यति। रिक्तस्थानानि पूरयन्तु इति वदिष्यति। अतः बहु पठिष्यामि।

अरुणः — भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा पठिष्यामः।

ज्योतिः — भवन्तौ द्वौ अपि मिलतः चेत् न पठिष्यतः, युद्धं करिष्यतः। अतः स्वगृहे एव पठेताम्।

### (2) प्रीत्या व्यवहरताम्

आदित्यः — अनुराग ! भवान् तत् पुस्तकम् आनयतु।

अनुरागः — अहं न आनयामि। आवश्यकं चेत् नयतु।

आदित्यः — भोः ! भवान् कदा सन्तोषेण वदति ? सदा कोपं करोति।

अनुरागः — त्वमपि कदापि प्रीत्या न वदसि। आदेशं करोषि।

आदित्यः — सदा श्रद्धया कार्यं करोतु। विनयेन सम्भाषणं करोतु।

अनुरागः — गच्छ त्वम्। सदा उपदेशं करोषि।

माता — किमर्थं कोपेन सह कलहं कुरुतः ? भवन्तौ सहोदरौ न किम् ? आदित्यः ! त्वं कोपेन मा तर्जय, सः दुःखेन रोदिति। सदा प्रीत्या व्यवहरताम्।

आदित्यः — अम्ब ! क्षम्यताम्। इतः परं सन्तोषेण एव भवावः।

अनुरागः — अम्ब ! अद्य मम विद्यालये एकः बालकः भीतिं कृतवान्। शिक्षिका प्रीत्या सान्त्वनां कृतवती। अनन्तरं सः आनन्देन निर्भयेन पठितवान्।

माता — अस्तु, भवन्तौ अपि एकाग्रचित्ततया पठताम्, श्रद्धया नमस्कारं कुरुताम्, परिश्रमेण उत्तमान् अङ्कान् प्राप्नुताम्। (तदा) अहमपि सन्तुष्टा भवामि।

आदित्यः — अस्तु अम्ब ! तथैव कुर्वः।

❑❑

# पाठ–7 निबन्ध–लेखनम्

## 1. अस्माकं देशः

1. भारतः अस्माकं देशः अस्ति।
2. अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति।
3. अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति।
4. अयं देशः प्रकृतेः क्रीडास्थली अस्ति।
5. अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति।
6. अस्य उत्तरस्यां दिशि हिमालयः रक्षकः इव स्थितः।
7. अत्र सर्वधर्माणां समानः अधिकारः अस्ति।
8. अस्य भूमिः विविधरत्नानां जननी अस्ति।
9. अत्र विविधाः जातयः निवसन्ति।
10. अस्माभिः सदा अस्य रक्षा करणीया।

## 2. वसन्तः

1. अस्माकं देशे षड् ऋतवः भवन्ति।
2. एषु वसन्तः अपि एकः ऋतुः अस्ति।
3. अयं 'ऋतुराजः' कुसुमाकरः 'मधुमासः' इत्यपि कथ्यते।
4. वसन्ते प्रकृतिः विविधरूपाणि धारयित्वा नृत्यति।
5. अस्मिन् ऋतौ सर्वे लतावृक्षादयः पुष्पाणि धारयन्ति।
6. वसन्ते प्रकृतिस्वरूपम् अतिशोभनं भवति।
7. आम्राणां वृक्षेषु मञ्जर्यः शोभन्ते।
8. जलाशयानां जलम् अपि शोभितं भवति।
9. शीतलः सुगन्धयुक्तः पवनः प्रवहति।
10. किं बहुना, सर्वं खलु नवीनम् इव भवति।

## 3. मम ग्रामः

1. अहं रामपुरनामके ग्रामे निवसामि।
2. अत्र एकः विशालः जलाशयः अस्ति।
3. अस्मिन् सदा कमलानि विकसन्ति।
4. ग्रामवासिनः जलाशये स्नानं कुर्वन्ति।
5. अत्र एकः उच्चः प्राथमिकः विद्यालयः अपि अस्ति।
6. सर्वे बालकाः बालिकाः च अस्मिन् पठन्ति।
7. ग्रामं परितः कृषकाणां क्षेत्राणि सन्ति।
8. अत्र सर्वे जनाः धेनूः पालयन्ति।
9. मम ग्रामे सर्वे जनाः परस्परं, साहाय्यं कुर्वन्ति।
10. मम ग्रामः नगरात् श्रेष्ठतरः अस्ति।

## 4. भारतीयः कृषकः

1. भारतदेशः कृषिप्रधानः देशः अस्ति।
2. कृषकाः प्रायः ग्रामेषु निवासं कुर्वन्ति।
3. कृषकाः परिश्रमेण स्वक्षेत्राणि कर्षन्ति।
4. कृषकाः अन्नस्य उत्पादनं कृत्वा सर्वेषां पालनं कुर्वन्ति।
5. कृषकाणाम् उन्नत्या एव राष्ट्रस्य उन्नतिः भवति।
6. कृषकाणां जीवनम् अतिसरलं भवति।
7. बलीवर्दाः एव तेषां सहचराः भवन्ति।
8. सर्वेषां पालकत्वेन कृषकाः एव राष्ट्रस्य पितरः सन्ति।
9. कृषकाणां कठिनश्रमेण राष्ट्रः धनधान्येन पूर्यते ।
10. अहो ! भारतीयाः कृषकाः धन्याः सन्ति।

## 5. हिमालयः

1. भारतस्य उत्तरस्यां दिशि हिमालयः स्थितः अस्ति।
2. अयं 'पर्वतराजः' नगाधिराजः वा अपि कथ्यते।
3. अयं सर्वेषु पर्वतेषु उच्चतमः अस्ति।
4. अस्य अत्युच्चानि शिखराणि अतीव शोभन्ते।
5. अत्र विविधाः ओषधयः उत्पन्नाः भवन्ति।
6. देवाः अपि अत्रैव निवासं कुर्वन्ति।
7. गंगादयः पवित्रतमाः नद्यः हिमालयात् एव निर्गच्छन्ति।
8. अयं पर्वतः प्रकृतेः क्रीडाभूमिः अस्ति।
9. अयं पर्वतः भारतदेशं शत्रुभ्यः सर्वदा रक्षति।
10. अयं पर्वतः सर्वथा सर्वेषां हितकरः अस्ति।

## 6. महात्मा गांधी

1. महात्मा गांधी भारतराष्ट्रस्य उन्नायकः नेता आसीत्।
2. एष एव आंग्लशासनस्य विरोधे अहिंसान्दोलनं संचालितवान्।
3. अयमेव स्वतन्त्रतासंग्रामस्य प्रधानः सेनानी आसीत्।
4. अयं राष्ट्रपिता इत्यपि कथ्यते।
5. अस्य पूर्णनाम मोहनदास कर्मचन्द गांधी आसीत्।
6. अयं महापुरुषः 1869 तमे ईस्वीयाब्दे अक्टूबर मासस्य द्वितीयतिथौ जन्म अलभत् ।
7. अस्य जन्म गुर्जरप्रान्ते पोरबन्दरनाम्नि स्थाने अभवत्।
8. अस्य पितुः नाम कर्मचन्द गांधी आसीत्।
9. महात्मा गांधी स्वजीवनं देशरक्षायै समर्पितवान्।
10. अयं भारतदेशस्य स्वतन्त्रतायाः प्रवर्तकः आसीत्।

## 7. मेलापकम्

1. भारतवर्षे विविधावसरेषु मेलापकानि आयोज्यन्ते ।
2. एतानि मेलापकानि विभिन्न संस्कृतीनां संगमस्थलानि भवन्ति ।

3. एतानि देशस्य सांस्कृतिकविशेषता: प्रकटयन्ति ।
4. मेलापकानाम् उत्सवमयवातावरणं मह्यम् अतीव रोचते ।
5. गतसप्ताहे मम ग्रामे विजयादशम्या: मेलापकम् आसीत्।
6. परिवारेण सह अहमपि तत्र अगच्छम् ।
7. मेलाक्षेत्रे सर्वत्र नानाविधक्रीडनकानि दृश्यन्ते स्म।
8. अनेकानि खाद्य पदार्थानि अपि तत्र आसन् ।
9. सायंकाले रावणदहनम् अभवत् ।
10. मेलाक्षेत्रे महदानन्दमनुभूय वयं गृहं प्रत्यागच्छाम ।

**8. मम प्रिय पुस्तकम्**

1. पुस्तकानि निधय: ज्ञानस्य भवन्ति ।
2. ज्ञानप्रदानेन सहैव एतानि अस्माकं मनोरंजनमपि कुर्वन्ति।
3. प्रेरणादायकपुस्तकानि मह्यम् अतीव रोचन्ते ।
4. ईदृशमेव एकं पुस्तकं श्रीमद्भगवद्गीता अस्ति ।
5. अस्मिन् पुस्तके मानवमात्राय कल्याणसन्देश: निहित: ।
6. इदम् अस्मान् श्रेष्ठसफलजीवनस्य मार्गं दर्शयति ।
7. अत्र निहित: कर्मयोग: मानवान् उद्योगिन: करोति।
8. अस्य अध्ययनं जनेषु कर्म प्रति रुचिं जनयति ।
9. स्वार्थहीनकर्मकरणेन मनुष्या: श्रेष्ठसन्तुष्टजीवनं यापयन्ति।
10. एवम् इदं पुस्तकं सम्पूर्णं जीवनदर्शनम अस्ति ।

**9. मम प्रियमित्रम्**

1. अस्मिन् संसारे मित्रं महत्सहायकं भवति ।
2. तदेव मित्रं श्रेष्ठं यद् विपत्तौ मित्रस्य साहाय्यं करोति।
3. विपत्तौ एव उत्तममित्रस्य अभिज्ञानं भवति ।
4. श्रेष्ठमित्रस्य प्राप्ति: महत्सौभाग्यविषय: अस्ति ।
5. आत्मानं सौभाग्यशालिनं मन्ये यत् मोहन: मम मित्रम् अस्ति ।
6. मम पितु: रुग्णावस्थायां स: अस्माकं महतीं सहायताम् अकरोत्।
7. त्रिदिवसपर्यन्तं चिकित्सालये एव स्थित्वा स: तस्य शुश्रूषाम् अकरोत्।
8. तस्य परिवारम् अपि अस्माकं सहायतार्थम् आगच्छत्।
9. तेषां सहयोगेन मम मातु: चिन्ता समाप्ता ।
10. वस्तुत: श्रेष्ठमित्रम् एवमेव स्यात् ।

**10. धेनु:**

1. धेनु: अस्मभ्यं महदुपयोगी पशु: अस्ति ।
2. भारतीया: तु इमां मातृवत् मन्यन्ते ।
3. यथा माता बालकान् पालयति तथैव धेनुरपि स्वदुग्धेन अस्मान् पोषयति ।
4. अस्या: दुग्धेन नानाविधपक्वान्नानि पच्यन्ते ।
5. अस्या: दुग्धम् अन्ये च दुग्धोत्पादा: पुष्टिकरा: भवन्ति।
6. अस्या: गोमयेन अद्यापि ग्रामेषु गृहाणि लिम्प्यन्ते शुध्यन्ते च।
7. गोमूत्रेण नानाविधरोगाणाम् उपचारं क्रियते ।
8. अस्या: वत्सा: क्षेत्रेषु हलं कर्षन्ति ।
9. अस्या: महत्त्वं शास्त्रेषु अपि वर्णितम् ।
10. अस्माभि: सर्वैरपि धेनु: सर्वदा पूज्येत ।

❑❑

## पाठ-8 सड़क सुरक्षा

**1.** राजमार्ग-सुरक्षार्थम् अस्माभि: सडक-सुरक्षा- नियमानां ज्ञानं प्राप्तव्यम्। राजमार्गम् उभयत: स्थापितानां यातायात-सङ्केतानाम् अभिज्ञानमपि करणीयम्। अल्पायुसि एव वाहन न चालयेत्। वाहन-सञ्चालन काले उच्च-स्वरेण सङ्गीत वर्जयेत्। मार्गे ध्यानं सर्वत: आकृष्य मार्गागतानि वस्तूनि एव न पश्येत्। नैतस्मिन् काले धूम्रपानं कुर्यान्न च चलदूरभाषे केनापि सह वार्तालापं कुर्यात्। सहयात्रिभि: सार्धमपि न संवदेत्।

**2.** सामान्यत: जना: यातायात-नियमेभ्य: अनभिज्ञा: भवानि। विज्ञा: अपि यातायात सङ्केतान् न पश्यन्ति। बहव: तु उपेक्षन्ते। जना: भूमिगतपदाति मार्गस्योपयोगमपि न कुर्वन्ति। निषेधेऽपि निषेध मार्गं प्रविशन्ति। वाहन चालक: समीपस्थै: जनै: सह, चल दूरभाषे च दत्तचित्ता: सन्त: वार्तालापं कुर्वन्ति। केचन तु उपहास-निमग्ना: परिवर्त्य पृष्ठ भागे पश्यन्ति सहयात्रिण:।

**3.** गृहे परिजनै: विद्यालये च शिक्षकै: छात्रा: एतद्विषये प्रशिक्षणीया। प्रार्थना-सभायां समये-समये सडक सुरक्षा नियमानां ज्ञानं प्रदेयम्। भूगोलविषयाध्ययन काले विषयाध्यापकेन यथावसरं यातायात-सङ्केतानां मानचित्राध्ययनस्य परिचय: प्रदेय:। विद्यालये एतद्विषयक प्रश्न-पृच्छा-स्पर्धा अपि आयोज्या। वृत्तपत्रेषु सडक दुर्घटनाया: समाचारं श्रावयित्वा तं प्रति सावहितं कुर्यात् तेभ्य: च मार्ग-सञ्चरण

नियम–ज्ञानपि पुनः–पुनः प्रदेयम्। एकस्मिन् सत्रे वारद्वयं सडक–सुरक्षा–नियमान् आधृत्य संवाद, वाद–विवाद, भाषणादीनां स्पर्धानामप्यायोजनं कुर्यात् विजेतारश्च पुरस्करणीयाः।

**4.** सुसञ्चालनं विधाय वाहन चालकः दुर्घटनां परिहर्तुं शक्नोति। अतः सुसञ्चालकः जनसम्मर्दाकीर्णमार्गे वाहनं कदापि तीव्र गत्या न चालयेत। वाहनस्यगतिः निर्धारिता निर्दिष्टा नियन्त्रिता च भवेत्। अपर्याप्तमपि मार्गं प्राप्य अग्रगमनस्य प्रयत्नं न कुर्यात्। द्रुत गमनमपि सदैव वर्जनीयम्। आगते गत्यावरोधके वाहनस्य गतिरपि अवरोधनीया। निर्दिष्टं मार्गमेवानुसरेत्।

**5.** (i) सङ्केतोऽयं सन्दशकावर्त (U-TURN) इति कथ्यते यन्निर्दिशति यदत्र व्यावर्तन निषिद्धम्।

(ii) सङ्केतोऽयं निर्दिशति यदत्र प्रवेशः निषिद्धः अतः नात्र गन्तव्यम्।

(iii) ओवरटेक–निषेधकं चिह्नमुपदिशति यत्र अग्रगमन–प्रयत्नं निषिद्धम्।

**6.** यदा वाहन–चालकः सडक–सुरक्षा–नियमान् न पालयति तदा छात्रैः सः निरोधनीय, बोधनीयः विरोधनीयः। एषा उपेक्षा भावना च अवरोधनीया। तस्यायनुचित–व्यवहारस्य परिवादः विद्यालयस्याधिकारिणां समक्षे निवेदनीयः। अधिकारिभिः असौ सम्यक् निर्देष्टव्यः। यद्यसौ पुनरपि करोति तदा परिवर्तनीयः अन्यथा आरक्षि- स्थाने परिवादः प्रस्तोतव्यः सः यातायात- नियमानवगन्तु चं आदिष्टव्यः। छात्रैः शिक्षकैः अधिकारिभिश्चासौ उपेक्षणीयः।

**7.** केचन छात्राः बालकाः व अल्पायुसि एव वाहन–चालनाय अत्युत्सुकाः भवन्ति। ते वाहन- चालनेऽनभिज्ञा अल्पज्ञाः वा सन्तोऽपि वाहनं नीत्वा राजमार्गे आगच्छन्ति। वाहन–चालनस्य प्रयत्न कुर्वन्ति एवं दुर्घटना सम्भवति अतोऽल्पायुसि बालकैः वाहन–चालन कार्यं न कुर्यात्। षोडशदेश वर्षीया बालकाः गियर (गतिपरिवर्तक) युक्त वाहनं न चालयेयुः। प्रशिक्षिताः अपि केचन बालकाः आत्मविश्वासस्य अभावे असावधानतया दुर्घटनां विदधति। अतः आत्मविश्वास न त्यजेत् परञ्च वाहने चलदूरभाषै सङ्गीतं चापि न श्रणुयु सहयात्रिणा सह वार्तालापमपि न कुर्युः।

**8.** राजमार्गस्य वामपार्श्वे एव चलेत्। व्यावर्तनेः चतुष्पथे, पदातिमार्गे, गत्यावरोधके च वाहनं शनैः शनैः चालयेत। उभयतः संलग्नयोः आदर्शयोः मार्गस्थितिं विचरन्तश्च जनान् पश्येत्। व्यावर्तने हस्त–सङ्केत कुर्यात्। द्विचक्रवाहन चालकेन शिरस्त्राणम् (हैलमेट) अवश्यनेन धारणीयम्। यातायात संकेतान् अवलोक्य अभिज्ञाय, तेषाम् अभिप्राय प्रयोजनं वा ज्ञात्वा अनुपालयेत् राजमार्गविभाजिका पीत रेखा नोल्लङ्घनीया। वाहनोऽकस्मात् नावरोधनीय। पश्चगमने आदर्शयो स्थितिं जन–सम्मर्द च पश्येत सावहितः सन् चालयेत्।

**9.** 'प्रवेश निषेध' मार्गं न प्रविशेत्। यदि प्रविशति तदा किमपि दुर्घटितुं शक्यते। स्वस्यापरस्य व हानिर्भवितुं शक्नोति। तत्र नियुक्तः राज–पुरुषः निरोद्धं शक्नोति, वाहनस्य चालनं विधाय परिवादमपि आरब्धुं शक्नोति। अनेन आर्थिकहानिः तु भविष्यति एव मानसिक अशान्तिः अपि वर्धिष्यते। न्यायालयः दण्डयितु शक्नोति। अवमानना वाहनस्य क्षतिः सम्भवति वाहनमपि निरोद्धुं शक्यते। अतः प्रवेश निषेध मार्गे प्रविष्टेतु अपाय एव सम्भवति।

**10.** राजमार्ग सङ्केताः मुख्यतः चतुर्धाः भवन्ति। एतेषु प्रवेश–निषेधादयः पञ्चत्रिंशत सङ्केताः अनिवार्याः भवन्ति एते वृत्ताकारेऽङ्किताः भवन्ति। सचेतकाः सङ्केताः त्रिकोणात्मकाः अङ्किताः भवन्ति, एते व्यावर्तनादिबोधकाः चत्वारिंशत् भवन्ति। सूचना चिह्नाणि विद्यमानता बोधकानि पञ्चदश संख्यकानि भवन्ति। चतुर्थ–विद्या दश सङ्केताः यातायात- कर्मकरस्य हस्ताभ्यां सङ्केतिताः भवन्ति। चतुष्पथे पुलिस कर्मकारः स्व हस्तयोः मार्गं, व्यावर्तक मार्गस्य रिक्ततां व्यस्ततां च दर्शयति।

❑❑